॥ अथ नारदीया शिक्षा ॥

॥ सामवेदीया ॥

सामगाचार्य्यश्रीसत्यव्रतसामश्रमिणा
सम्पादिता प्रकाशिता च ॥

(सामश्रमिकृतटीप्पनीसहिता टीका चास्या द्रुतं प्रकाश मेष्यति)

CALCUTTA.

16—1, GHOSHE'S LANE, SATYA PRESS.
Printed by Priya Vrata Bhattacharjya.

1890

॥ अथ नारदीया शिक्षा ॥

(सामवेदीया)

॥ हरिः ॐ ॥

अथातः स्वरशास्त्राणाᳬ सर्वेषां वेदनिश्चयम् ।
उच्चनीचविशेषाद्धि स्वरान्यत्त्वं प्रवर्त्तते ॥ १
आर्चिकं गाथिकं चैव सामिकं च स्वरान्तरम् ।
कृतान्ते स्वरशास्त्राणां प्रयोक्तव्ं विशेषतः ॥ २
एकान्तरः स्वरो ह्यृक्षु गाथासु द्व्यन्तरः स्वरः ।
सामसु त्र्यन्तरं विद्यादेतावत् स्वरतोऽन्तरम् ॥ ३
ऋक्सामयजुरङ्गानि ये यज्ञेषु प्रयुञ्जते ।
अविज्ञानाद्धि शास्त्राणां तेषां भवति विस्वरः ॥ ४
"मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्या प्रयुक्तो न त मर्थ माह ।
स वाग्वज्रो यजमानᳬ हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥" ५
प्रहीणः स्वरवर्णाभ्यां यो वै मन्त्रः प्रयुज्यते ।
यज्ञेषु यजमानस्य रुषत्यायुः प्रजां पशून्[1] ॥ ६

१ "विनाशयति प्रजां पशून्"—इति ख ।

उरः कण्ठः शिरश्चैव स्थानानि त्रीणि वाङ्मये ।
सवनान्याहुरेतानि साम वाप्यर्थतोऽन्तरम् ॥ ७
उरः सप्तविचारं स्यात् तथा कण्ठस्तथा शिरः ।
न च सप्तोरसि व्यक्तास्तथा प्रावचनो विधिः ॥ ८
कठकालापवृत्तेषु तैत्तिरीयाह्वरकेषु च ।
ऋग्वेदे सामवेदे च वक्तव्यः प्रथमः स्वरः ॥ ९
ऋग्वेदस्तु द्वितीयेन तृतीयेन च वर्त्तते ।
उच्चमध्यमसङ्घातः स्वरो भवति पार्थिव ॥ १०
तृतीयप्रथमक्रुष्टान् कुर्वन्त्याह्वरकाः स्वरान् ।
द्वितीयाद्यांस्तु मन्द्रान्तांस्तैत्तिरीयाश्चतुरः स्वरान् ॥ ११
प्रथमश्च द्वितीयश्च तृतीयोऽथ चतुर्थकः ।
मन्द्रः क्रुष्टो ह्यतिस्वार एतान् कुर्वन्ति सामगाः ॥ १२
द्वितीयप्रथमावेतौ ताण्डिभाल्लविनां स्वरौ ।
तथा शातपथावेतौ स्वरौ वाजसनेयिनाम् ॥ १३
एते विशेषतः प्रोक्ताः स्वरा वै सार्ववैदिकाः ।
इत्येतच्चरितं सर्वं स्वराणां सार्ववैदिकम् ॥ १४

॥ इति प्रथमः खण्डः ॥

———

सामवेदे तु वक्ष्यामि स्वराणां चरितं यथा ।
अल्पग्रन्थं प्रभूतार्थं श्रव्यं वेदाङ्गमुत्तमम् ॥ १

तानरागस्वरग्राममूर्च्छनानां तु लक्षणम् ।
पवित्रं पावनं पुण्यं नारदेन प्रकीर्त्तितम् ॥ २
शिक्षा माहुर्द्विजातीना मृग्यजुःसामलक्षणम् ।
नारदीय मशेषेण निरुक्त मनुपूर्वशः ॥ ३
सप्त स्वरास्त्रयो ग्रामा मूर्च्छनास्त्वेकविंशतिः ।
ताना एकोनपञ्चाशदित्येतत् स्वरमण्डलम् ॥ ४
षड्जश्च ऋषभश्चैव गान्धारो मध्यमस्तथा ।
पञ्चमो धैवतश्चैव निषादः सप्तमः स्वरः ॥ ५
षड्जमध्यमगान्धारास्त्रयो ग्रामाः प्रकीर्त्तिताः ।
भूर्लोकाज्जायते षड्जो भुवर्लोकाच्च मध्यमः ॥ ६
स्वर्गान्नान्यत्र गान्धारो नारदस्य मतं यथा ।
स्वररागविशेषेण ग्रामरागा इति स्मृताः ॥ ७
विंशन्निर्मध्यमग्रामे षड्जग्रामे चतुर्दश ।
तानान् पञ्चदशेच्छन्ति गान्धारग्राममाश्रितान् ॥ ८
नन्दी विशाला सुमुखी चित्रा चित्रवती सुखा ।
बलाया चाथ विज्ञेया देवानां सप्त मूर्च्छनाः ॥ ९
आप्यायिनी विश्वभृता चन्द्रा हेमा कपर्दिनी ।
मैत्री बार्हती चैव पितॄणां सप्त मूर्च्छनाः ॥ १०
षड्जे तूत्तरमन्द्रा स्यादृषभे चाभिरुद्गता ।
अश्वक्रान्ता तु गान्धारे तृतीया मूर्च्छना स्मृता ॥ ११

मध्यमे खलु सौवीरा हृष्यका पञ्चमे स्वरे ।
धैवते चापि विज्ञेया मूर्च्छना तूत्तरायता ॥ १२
निषादाद्रजनीं विद्यादृषीणां सप्त मूर्च्छनाः ।
उपजीवन्ति गन्धर्वा देवानां सप्त मूर्च्छनाः ॥ १३
पितृणां मूर्च्छनाः सप्त तथा यक्षा न संशयः ।
ऋषीणां मूर्च्छनाः सप्त यास्त्विमा लौकिकाः स्मृताः ॥ १४
षड्जः प्रीणाति वै देवानृषीन् प्रीणाति चर्षभः ।
पितॄन् प्रीणाति गान्धारो गन्धर्वान् मध्यमः स्वरः ॥ १५
देवान् पितॄनृषींश्चैव स्वरः प्रीणाति पञ्चमः ।
यक्षान्निषादः प्रीणाति भूतग्रामं च धैवतः ॥ १६

॥ इति द्वितीयः खण्डः ॥

गानस्य तु दशविधा गुणवृत्तिस्तद्यथा ।—

रक्तं पूर्णमलङ्कृतं प्रसन्नं व्यक्तं विक्रुष्टं श्लक्ष्णं समं सुकुमारं मधुरमिति गुणाः । तत्र रक्तं नाम वेणुवीणास्वराणामेकीभावे रक्तमित्युच्यते । पूर्णं नाम स्वरश्रुतिपूरणाच्छन्दःपादाक्षरसंयोगात् पूर्णमित्युच्यते । अलङ्कृतं नामोरसि शिरसि कण्ठयुक्तमित्यलङ्कृतम् । प्रसन्नं नामावगतगद्गदनिर्विशङ्कं प्रसन्नमित्युच्यते । व्यक्तं नाम पदपदार्थप्रकृतिविकारागम-

लोपकृत्तद्धितसमासधातुनिपातोपसर्गस्वरलिङ्गवृत्तिवार्त्तिकविभक्त्यर्थवचनानां सम्यगुपपादने व्यक्तमित्युच्यते । विक्रुष्टं नामोच्चैरुच्चारितं व्यक्तपदाक्षरमिति विक्रुष्टम् । श्लक्ष्णं नामाद्रुतमविलम्बितमुच्चनीचप्लुतसमाहारं हेलतालोपनयनादिभिरुपपादनाभिः श्लक्ष्णमित्युच्यते । समं नामावापनिर्वापप्रदेशप्रत्यन्तरस्थानानां समासः सममित्युच्यते । सुकुमारं नाम मृदुपदवर्णस्वरकुहरणयुक्तं सुकुमारमित्युच्यते । मधुरं नाम स्वभावोपनीतललितपदाक्षरगुणसमृद्धं मधुरमित्युच्यते । एवमेतैर्दशभिर्गुणैर्युक्तं गानं भवति ।

भवन्ति चात्र श्लोकाः—

"शङ्कितं भीतमुद्घृष्टमव्यक्तमनुनासिकम् ।
काकस्वरं शिरसि गतं तथा स्थानविवर्जितम् ॥ १
विस्वरं विरसं चैव विश्लिष्टं विषमाहतम् ।
व्याकुलं तालहीनं च गीतिदोषाश्चतुर्दश ॥ २
आचार्याः सममिच्छन्ति पदच्छेदं तु पण्डिताः ।
स्त्रियो मधुरमिच्छन्ति विक्रुष्टमितरे जनाः ॥ ३

॥ इति तृतीयः खण्डः ॥

पद्मपत्रप्रभः षड्ज ऋषभः शुकपिञ्जरः ।
कनकाभस्तु गान्धारो मध्यमः कुन्दसप्रभः ॥ १
पञ्चमस्तु भवेत् कृष्णः पीतकं धैवतं विदुः ।
निषादः सर्ववर्णस्त्वित्येताः स्वरवर्णताः ॥ २
पञ्चमो मध्यमः षड्ज इत्येते ब्राह्मणाः स्मृताः ।
ऋषभो धैवतश्चापीत्येतौ तु क्षत्रियावुभौ ॥ ३
गान्धारश्च निषादश्च वैश्यावर्द्धेन वै स्मृतौ ।
शूद्रत्वं विद्धि चार्द्धेन पतितत्वान्न संशयः ॥ ४
ऋषभोत्थितषड्जहतो धैवतसहितश्च पञ्चमो यत्र ।
निपतति मध्यमरागे तं निषादं षाडवं विद्यात् ॥५
यदि पञ्चमो विरमते गान्धारश्चान्तरस्वरो भवति ।
ऋषभो निषादसहितस्तं पञ्चमं मीदृशं विद्यात् ॥६
गान्धारस्याधियत्वेन निषादस्य गतागतैः ।
धैवतस्य च दौर्बल्यान्मध्यमग्राम मुच्यते ॥ ७
ईषत्स्पृष्टो निषादस्तु गान्धारश्चाधिको भवेत् ।
धैवतः कम्पितो यत्र षड्जग्रामं तु निर्दिशेत् ॥ ८
अन्तरस्वरसंयुक्ता काकलिर्यत्र दृश्यते ।
तं तु साधारितं विद्यात् पञ्चमस्थं तु कैशिकम् ॥९
कैशिकं भावयित्वा तु स्वरैः सर्वैः समन्ततः ।
यस्मात्तु मध्यमे न्यासस्तस्मात् कैशिकमध्यमः ॥ १०

काकलिर्दृश्यते यत्र प्राधान्यं पञ्चमस्य तु ।
कश्यपः कैशिकं प्राह मध्यमग्रामसम्भवम् ॥ ११
गीतिं गेयं विदुः प्राज्ञा धेति कारुप्रवादनम् ।
धेति वाद्यस्य संज्ञेयं गन्धर्वस्य विरोचनम् ॥ १२

॥ इति चतुर्थः खण्डः ॥

यः सामगानां प्रथमः स वेणोर्मध्यमः स्वरः ।
यो द्वितीयः स गान्धारस्तृतीयस्त्वृषभः स्मृतः ॥ १
चतुर्थः षड्ज इत्याहुः पञ्चमो धैवतो भवेत् ।
षष्ठो निषादो विज्ञेयः सप्तमः पञ्चमः स्मृतः ॥ २
षड्जं वदति मयूरो गावो रम्भन्ति चर्षभम् ।
अजाविकौ तु गान्धारं क्रौञ्चो वदति मध्यमम् ॥ ३
पुष्पसाधारणे काले कोकिलो वक्ति पञ्चमम् ।
अश्वस्तु धैवतं वक्ति निषादं वक्ति कुञ्जरः ॥ ४
कण्ठादुत्तिष्ठते षड्जः शिरसस्त्वृषभः स्मृतः ।
गान्धारस्त्वनुनासिक्य उरसो मध्यमः स्वरः ॥ ५
उरसः शिरसः कण्ठादुत्थितः पञ्चमः स्वरः ।
ललाटाद् धैवतं विद्यान्निषादं सर्वसन्धिजम् ॥ ६
नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संश्रितः ।
षड्भिः सञ्जायते यस्मात् तस्मात् षड्ज इति स्मृतः ॥७

वायुः समुत्थितो नाभेः कण्ठशीर्षसमाहतः ।
नर्दत्यृषभवद्यस्मात्तस्मादृषभ उच्यते ॥ ८
वायुः समुत्थितो नाभेः कण्ठशीर्षसमाहतः ।
नासां गन्धवहः पुण्यो गान्धारस्तेन हेतुना ॥ ९
वायुः समुत्थितो नाभेरुरोहृदि समाहतः ।
नाभिं प्राप्तो महानादो मध्यमत्वं समश्नुते ॥ १०
वायुः समुत्थितो नाभेरुरोहृत्कण्ठशिरोहतः ।
पञ्चस्थानोत्थितस्यास्य पञ्चमत्वं विधीयते ॥ ११
धैवतं च निषादं च वर्जयित्वा स्वरद्वयम् ।
शेषान् पञ्च स्वरांस्त्वन्यान् पञ्चस्थानोत्थितान्विदुः ।
पञ्चस्थानस्थितत्वेन सर्वस्थानानि धार्यते ॥ १२
अग्निगीतः स्वरः षड्ज ऋषभो ब्रह्मणोच्यते ।
सोमेन गीतो गान्धारो विष्णुना मध्यमः स्वरः ॥ १३
पञ्चमस्तु स्वरो गीतो नारदेन महात्मना ।
धैवतश्च निषादश्च गीतौ तुम्बुरुणा स्वरौ ॥ १४
आद्यस्य दैवतं ब्रह्मा षड्जस्याप्युच्यते बुधैः ।
तीक्ष्णदीप्तिप्रकाशत्वादृषभस्य हुताशनः ॥ १५
गावः प्रगीते तुष्यन्ति गान्धारस्तेन हेतुना ।
श्रुत्वा चैवोपतिष्ठन्ति सौरभेया न संशयः ॥ १६
सोमस्तु पञ्चमस्यापि दैवतं ब्रह्मराट् स्मृतम् ।

निष्क्रामो यस्य वृद्धिश्च ग्राम मासाद्य सोमवत् ॥ १७
अतिसन्धीयते यस्मादेतान् पूर्वोत्थितान् स्वरान् ।
तस्मादस्य स्वरस्यापि धैवतत्वं त्रिधीयते ॥ १८
निषीदन्ति स्वरा यस्मान्निषादस्तेन हेतुना ।
सर्वांश्चाभिभवत्येष यदादित्योऽस्य दैवतम् ॥ १९

॥ इति पञ्चमः खण्डः ॥

दारवी गात्रवीणा च द्वे वीणे गानजातिषु ।
सामिकी गात्रवीणा तु तस्याः शृणुत लक्षणम् ॥ १
गात्रवीणा तु सा प्रोक्ता यस्यां गायन्ति सामगाः ।
स्वरव्यञ्जनसंयुक्ता अंगुल्यांगुष्ठरञ्जिता ॥ २
हस्तौ सुसंयुतौ धार्यौ जानुभ्या मुपरि स्थितौ ।
गुरोरनुकृतिं कुर्याद् यथाज्ञानमतिर्भवेत् ॥ ३
प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम् ।
सावित्रीं चानुवचनं ततो वृत्तान्त मारभेत् ॥ ४
प्रसार्य चाङ्गुलीः सर्वा रोपयेत् स्वरमण्डलम् ।
न चाङ्गुलीभिरंगुष्ठ मंगुष्ठेनांगुलीः स्पृशेत् ॥ ५
विरला नांगुलीः कुर्यान्मूले चैना न संस्पृशेत् ।
अंगुष्ठाग्रेण ता नित्यं मध्यमे पर्वणि स्पृशेत् ॥ ६
मात्राद्विमात्रावृद्धानां विभागार्थं विभागवित् ।
अङ्गुलीभिर्द्विमात्रं तु पाणेः सव्यस्य दर्शयेत् ॥ ७

त्रिरेखा यत्र दृश्येत सन्धिं तत्र विनिर्दिशेत् ।
स पर्व इति विज्ञेयः शेष मन्तर मन्तरम् ॥ ८
यवान्तरं तु सामस्वृचु कुर्यात्तिलान्तरम् ।
स्वरान्मध्यमपर्वसु सुनिविष्टान्निवेशयेत् ॥ ९
न चात्र कम्पयेत् किञ्चिदङ्गस्यावयवम्बुधः ।
अधस्तनं मृदुं न्यस्य हस्त मास्ते यथाक्रमम् ॥ १०
अभ्रमध्ये यथा विद्युद् दृश्यते मणिसूत्रवत् ।
एषच्छेदो विवृत्तीनां यथा बालेषु कर्त्तरि ॥ ११
कूर्मोऽङ्गानीव सꣳहृत्य चेष्टां दृष्टिं दिशन्मनः ।
स्वस्थः प्रशान्तो निर्भीतो वर्णानुच्चारयेद्बुधः ॥ १२
नासिकायास्तु पूर्वेण हस्तं गोकर्णवद्धरेत् ।
निवेश्य दृष्टिꣳहस्ताग्रे शास्त्रार्थ मनुचिन्तयेत् ॥ १३
सम मुच्चारयेद्वाक्यं हस्तेन च मुखेन च ।
यथैवोच्चारयेद्वर्णाꣳस्तथैवैनान् समापयेत् ॥ १४
नात्याहन्यान्न निर्हन्यान्न प्रगायेन्न कम्पयेत् ।
समꣳसामानि गायेत व्योम्नि श्येनगतिर्यथा ॥ १५
यथाप्सु चरतां मार्गो मीनानां नोपलभ्यते ।
आकाशे वा विहङ्गानां तद्वत्स्वरगता श्रुतिः ॥ १६
यथा दधनि सर्पिः स्यात् काष्ठस्थो वा यथानलः ।
प्रयत्नेनोपलभ्येत तद्वत्स्वरगता श्रुतिः ॥ १७

स्वरात्स्वरꣳसंक्रामꣳस्तु स्वरसन्धि मनुल्बणम् ।
अविच्छिन्नꣳ समं कुर्यात् सूक्ष्मं छायातपोपमम् ।।१८
अनागत मतिक्रान्तं विच्छिन्नं विषमाहतम् ।
तन्वन्त मस्थितान्तं च वर्जयेत् कर्षणम्बुधः ॥ १९
स्वरस्थानाच्च्युतो यस्तु स्वꣳस्थान मतिवर्त्तते ।
विस्वरꣳसामगा ब्रूयुर्विरक्त मिति वीणिनः ॥ २०
अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम् ।
शिष्याणा मुपदेशार्थे कुर्याद् वृत्तिं विलम्बिताम् ॥२१
गृहीतग्रन्थ एवं तु ग्रन्थोच्चारणशिक्षकान् ।
हस्तेनाध्यापयेच्छिष्यान्क्रमेण विधिना द्विजः ॥ २२

॥ इति षष्ठः खण्डः ॥

क्रुष्टस्य मूर्द्धनि स्थानं ललाटे प्रथमस्य तु ।
भ्रुवोर्मध्ये द्वितीयस्य तृतीयस्य तु कर्णयोः ॥ १
कण्ठस्थानं चतुर्थस्य मन्द्रस्योरसि तूच्यते ।
अतिस्वारस्य नीचस्य हृदि स्थानं विधीयते ॥ २
अङ्गुष्ठस्योत्तमे क्रुष्टोऽङ्गुष्ठे तु प्रथमः स्वरः ।
प्रदेशिन्यां तु गान्धार ऋषभस्तदनन्तरम् ॥ ३
अनामिकायाꣳषड्जस्तु कनिष्ठायां तु धैवतः ।
तस्याधस्ताच्च योऽन्यस्तु निषादं तत्र निर्दिशेत् ॥ ४

अपर्वत्वादसंज्ञत्वादव्ययत्वाच्च नित्यशः ।
मन्द्रो हिनुहिभूतस्तु परिस्वार इति स्मृतः ॥ ५
क्रुष्टेन देवा जीवन्ति प्रथमेन तु मानवाः ।
पशवस्तु द्वितीयेन गन्धर्वाप्सरसस्त्वनु ॥ ६
आण्डजाः पितरश्चैव चतुर्थस्वरजीविनः ।
मन्द्रन्त्वेवोपजीवन्ति पिशाचासुरराक्षसाः ॥ ७
अतिस्वारेण नीचेन जगत्स्थावरजङ्गमम् ।
सर्वाणि खलु भूतानि धार्यन्ते सामिकैः स्वरैः ॥ ८
दीप्तायताकरुणानां मृदुमध्यमयोस्तथा ।
श्रुतीनां योऽविशेषज्ञो न स आचार्य उच्यते ॥ ९
दीप्ता मन्द्रे द्वितीये च प्र-चतुर्थे तथैव च ।
अतिस्वारे तृतीये च क्रुष्टे तु करुणा श्रुतिः ॥ १०
श्रुतयोऽन्या द्वितीयस्य मृदुमध्यायताः स्मृताः ।
तासा मपि तु वक्ष्यामि लक्षणानि पृथक् पृथक् ॥११
आयतात्वं भवेन्नीचे मृदुत्वं तु विपर्यये ।
स्वे स्वरे मध्यमात्वं तु तत्समीक्ष्य प्रयोजयेत् ॥ १२
द्वितीये विरता या क्रुष्टश्च परतो भवेत् ।
दीप्तान्तां तु विजानीयात् प्रथमे न मृदुः स्मृता ॥१३
अत्रैव विरता या तु चतुर्थे न प्रवर्त्तते ।
तथा मन्द्रे भवेद् दीप्ता साम्नश्चैव समापने ॥ १४

नाविरते श्रुतिं कुर्यात् स्वरयोर्नापि चान्तरे ।
न च ह्रस्वे च दीर्घे च न चापि घुटसंज्ञिते ॥ १५
द्विविधा गतिः पदान्तः स्थितसन्धिः सहोष्मभिः ।
पञ्चैतेषु स्थानेषु विज्ञेयं घुटसंज्ञितम् ॥ १६
स्वरान्तराविरस्तानि ह्रस्वदीर्घघुटानि च ।
श्रुतिस्थानेष्वशेषाणि श्रुतिवत्स्वरतो भवेत् ॥ १७
दीप्ता मुदात्ते जानीयाद्दीप्तां च स्वरिते विदुः ।
अनुदात्ते मृदुर्ज्ञेया गान्धर्वाः श्रुतिसम्पदाः ॥ १८
उदात्तश्चानुदात्तश्च स्वरितप्रचिते तथा ।
निघातश्चेति विज्ञेयः स्वरभेदस्तु पञ्चधा ॥ १९

॥ इति सप्तमः खण्डः ॥

अतऊर्ध्वं प्रवक्ष्यामि आर्चिकस्य स्वरत्रयम् ।
उदात्तश्चानुदात्तश्च तृतीयः स्वरितः स्वरः ॥ १
य एवोदात्त इत्युक्तः स एव स्वरितात्परः ।
प्रचयः प्रोच्यते तज्ज्ञैर्न चात्रान्यत् स्वरान्तरम् ॥ २
वर्णान्तरोऽतीतस्वारः स्वरितो द्विविधः स्मृतः ।
सार्धको वर्ण एवेति दीर्घस्तूच्चारितादनु ॥ ३
स तु सामविधौ ज्ञेयः स्वारः प्रत्ययदर्शनात् ।
पदेन तु स विज्ञेयो भवेद्यो यत्र यादृशः ॥ ४

सप्तस्वरान् प्रयुञ्जीत दक्षिणं[१] श्रवणं प्रति ।
आचार्यैर्विहितं शास्त्रं पुत्रशिष्यहितैषिभिः ॥ ५
उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा ।
वैस्वर्ये स्वारसंज्ञायां किं स्थानं स्वार उच्यते ॥ ६
उच्चनीचस्य यन्मध्ये साधारण मिति श्रुतिः ।
तं स्वारं स्वारसंज्ञायां प्रतिजानन्ति शैक्षिकाः ॥ ७
उदात्ते निषादगान्धारा वनुदात्त ऋषभधैवतौ ।
स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः ॥ ८
यत्र क-ख-परा ऊष्मा जिह्वामूलप्रयोजनाः ।
ता मध्याज्ज्ञापयेन्मात्रां प्रकृत्यैव तु सा कला ॥ ९
जात्यः क्षैप्रोऽभिनिहितस्तैरव्यञ्जन एव च ।
तिरोविरामः प्रश्लिष्टः पादवृत्तश्च सप्तमः ॥ १०
स्वराणा मह मेतेषां पृथग्वक्ष्यामि लक्षणम् ।
उद्दिष्टानां यथान्याय मुदाहरण मेव च ॥ ११

॥ इति अष्टमः खण्डः ॥

॥ प्रथमः प्रपाठकश्च समाप्तः ॥

---

१ "लक्षणं"—इति ख ।

सयकारं समं वापि अक्षरं स्वरितं भवेत् ।
न चोदात्तं पुरस्तस्य जात्यः स्वारः स उच्यते ॥ १
इ उ वर्णौ यदोदात्तावापद्येते यवौ क्वचित् ।
अनुदात्तप्रत्यये नित्यं विद्यात् क्षैप्रस्य लक्षणम् ॥ २
एङ्भ्यां आभ्या मुदात्ताभ्या मकारो निहितश्च यः ।
अकारं यत्र लुम्पन्ति त मभिनिहितं विदुः ॥ ३
उदात्तपूर्वं यत्किञ्चिच्छन्दसि स्वरितं भवेत् ।
एष सर्वबहुस्वारस्तैरव्यञ्जन उच्यते ॥ ४
अवग्रहात्परं यत्र स्वरितं स्यादनन्तरम् ।
तिरोविराममन्तं विद्यादुदात्तो यद्यवग्रहः ॥ ५
इकारं यत्र पश्येयुरिकारेणैव संयुतम् ।
उदात्त मनुदात्तेन प्रश्लिष्टं तन्निबोधत ॥ ६
स्वरो चेत् स्वरितं यत्र विवृत्ता यत्र संहिता ।
एतत्पादान्तवृत्तस्य लक्षणं शास्त्रचोदितम् ॥ ७
जात्यः स्वारः सजात्येन शुष्टाग्ने क्षैप्र उच्यते ।
तमन्वताभिनिहितस्तैरव्यञ्जन ऊतये ॥ ८
तिरोविरामो विष्कभिते प्रश्लिष्टो हीन्द्रगिर्वणः ।
पादवृत्तः कईवेदः स्वाराः सप्तैवमादयः ॥ ९
उभादिकाक्षरात् पूर्वं स्वर्यते यदि ह्यक्षरम् ।
स्वाराणां जात्यवर्णाना मेषा प्रकृतिरुच्यते ॥ १०

चत्वारस्त्वादितः स्वाराः काम्पम्पुष्यन्ति शाश्वतः ।
उदात्तं वैकनीचे वा जुह्वोग्निस्तच दर्शनम् ॥ ११

॥ इति प्रथमः खण्डः ॥

इकारान्ते पदे पूर्वं उकारे परतः स्थिते ।
ह्रस्वं कम्पं विजानीयान्मेधावी नात्र संशयः ॥ १
इकारान्ते पदे चैवोकारद्वयपरे पदे ।
दीर्घं कम्पं विजानीयादृग्व्यूष्विति निदर्शनम् । २
त्रयो दीर्घास्तु विज्ञेया ये च सन्ध्यक्षरेषु वै ।
मन्यापथ्यानइन्द्राभी शेषा ह्रस्वाः प्रकीर्त्तिताः ॥ ३
अनेकाना मुदात्ताना मनुदात्तः प्रत्ययो यदि ।
शिवकम्पं विजानीयादुदात्तः प्रत्ययो यदि ॥ ४
यत्र द्विप्रभृतीनि स्युरुदात्तान्यक्षराणि तु ।
नीचं चोच्चं च परतस्तत्रोदात्तं विदुर्बुधाः ॥ ५
न रेफे वा हकारे वा द्विर्भावो जायते क्वचित् ।
न च वर्गद्वितीयेषु न चतुर्थे कदाचन ॥ ६
न चतुर्थं तृतीयेन द्वितीयं प्रथमेन तु ।
आद्यमन्त्यं च मध्यं च स्वाक्षरेणैव पीडयेत् ॥ ७
अनन्त्यश्च भवेत्पूर्वोऽन्त्यश्च परतो यदि ।
तत्र मध्ये यमस्तिष्ठेत्सवर्णः पूर्ववर्णयोः ॥ ८

[illegible] कषसैः सार्द्धं मन्तस्थैश्चापि संयुतान् ।
[illegible] यमा निवर्त्तन्ते अदेशिक मिवाध्वगाः ॥ ९
[illegible] चतुर्थश्च चतुर्थादिपरम्पदम् ।
[illegible] तृतीयौ हकारश्च हकारादिपरम्पदम् ॥ १०
[illegible]नुस्वारोपधमूलानां न क्वचित् क्रमते परम् ।
[illegible] पूर्वं संयुते वाप्युत्तरं क्रमतेऽक्षरम् ॥ ११
संयोगे यत्र दृश्येत व्यञ्जनं विरते पदे ।
पूर्वाङ्ग मादितः कृत्वा पराङ्गादौ निवेशयेत् ॥ १२
संयोगे स्वरितं यत्रोद्दाते पत्तने यथा ।
पूर्वाङ्गं तद्विजानीयाद् येनारब्धस्तत्पराङ्गम् ॥ १३
संयोगात्तु परं स्वयं परं संयोगनायकम् ।
संयुक्तस्य तु वर्णस्य अस्वरं पूर्व मक्षरम् ॥ १४
अनुस्वारः पदान्तश्च क्रमजं प्रत्यये स्वके ।
स्वरभक्तिस्तथारेफः सर्वं पूर्वाङ्ग मुच्यते ॥ १५
पादादौ च पदादौ च संयोगावग्रहेषु च ।
य-शब्द इति विज्ञेयो योन्यः स य इति स्मृतः ॥ १६
पदादावप्यविच्छेदे संयोगान्ते च तिष्ठताम् ।
वर्जयित्वा रहयाणा मयादेशः प्रदृश्यते ॥ १७
स्वसंयुक्तो गुरुर्ज्ञेयः सानुस्वारोग्निमः स्फुटः ।
[illegible]गुशेषोऽध्वगो वापि युगलादिरविस्फुटः ॥ १८

॥ इति द्वितीयः खण्डः ॥

यदुदात्त मनुदात्तं तद्यत्स्वरितं तत्पदे भवति नीचम् ।
यन्नीचं नीच मेव तद्यत्प्रचयस्थं तदपि नीचम् ॥ १
अयमग्निःसुते मित्रमिदंवय मयावहाः ।
प्रियं दूतं घृतं वित्त मभिशब्दश्च नीचतः ॥ २
अर्केष्वेव सुतेष्वेव यज्ञेषु कलशेषु च ।
जातेषु सप्तवित्तेषु नीचादुच्चार्यते श्रुतिः ॥ ३
हरिवरुणवरेण्येषु धारापुरुषेषु च स्वरति रेफः ।
विश्वानरो नकारे च शेषा स्वरिता नराः ॥ ४
द्वौ वरुणौ व स्वरित उदुत्तमं त्वं वरुण ।
धाकारे चोरुधारा मुरुधारेव दोहते ॥ ५
मात्रिकं वा द्विमात्रं वा स्वर्यते यदिहाक्षरम् ।
तस्यादितोऽर्द्धमात्रा वै शेषं तु परतो भवेत् ॥ ६
अदीर्घं दीर्घवत्कुर्यात् द्विस्वरं यत् प्रयुज्यते ।
कम्पोत्स्वरिताभिगीतꣳ क्ष्वकर्षण मेव च ॥ ७
निमेषकाला मात्रा स्याद् विद्युत्कालेति चापरे ।
ऋक्स्वरा तुल्ययोगा वा मतिः स्यात्सोमशर्मणः ॥ ८
समासेऽवग्रहं कुर्यात् पदं चात्रानुसꣳहिताम् ।
यतोऽक्षरादितिकरणं पदान्तं तस्य तं विदुः ॥ ९
सर्वत्र पुत्रमित्रसखिशब्दा
अद्रिशतक्रतोरवग्राह्याः ।

आदित्यविप्रजातवेदाश्च
सत्पतिगोपतिवृत्रहासमुद्राश्च ॥ १०
पुर्णो द्ययवश्च अरतिं देवतातये ।
[illegible]तिश्च ऋधं चैव नावगृह्णन्ति पण्डिताः ॥ ११

॥ इति तृतीयः खण्डः ॥

विवृत्तयश्चतस्रो वै विज्ञेया इति मे मतम् ।
अक्षराणां नियोगेन तासां नामानि मे शृणु ॥ १
ह्रस्वादिर्वत्सानुसृजावत्सानुसारिणी चाग्रे ।
पाकवत्युभयोर्ह्रस्वा दीर्घवृद्धा पिपीलिका ॥ २
चतसृणां विवृत्तीना मन्तरं मात्रिकं भवेत् ।
अर्द्धमात्रिक मन्येषा मन्येषा मणुमात्रिकम् ॥ ३
आपद्यते मकारो रेफोष्मसु प्रत्ययेष्वनुस्वारम् ।
यवलेषु परसवर्णꣳ स्पर्शेषु चोत्तमापत्तिम् ॥ ४
नकारान्ते पदे पूर्वे स्वरे च परतः*स्थिते ।
आकारं रक्त मित्याहुर्नकारेण तु रज्यते ॥ ५
नकारान्ते पदे पूर्वे व्यञ्जनैश्च यवोहिषु ।
अर्द्धमात्रा तु पूर्वस्य रज्यते त्वणुमात्रया ॥ ६
नकारस्वरसंयुक्तश्चतुर्युक्तो विधीयते ।
रेफो रङ्गश्च लोपश्च अनुस्वारोऽपि वा क्वचित् ॥ ७

हृदयादुत्तिष्ठते रङ्गः काꣳस्येन समनिःस्वनः ।
मृदुश्चैव द्विमात्रश्च दधन्वाꣳ इति दर्शनम् ॥ ८
यथा सौराष्ट्रिका नारी अराꣳ इत्यभिभाषते ।
एवं रङ्गः प्रयोक्तव्यो नारदस्य मतं यथा ॥ ९
स्वरा गडदबाश्चैव ङणनमाः सहोष्मभिः ।
चतुर्णां पदजातीनां पदान्ता दश कीर्त्तिताः ॥ १०

॥ इति चतुर्थः खण्डः ॥

— — —

स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च ।
व्यञ्जनान्यनुवर्त्तन्ते यत्र तिष्ठति स स्वरः ॥ १
स्वरप्रधानं त्रैस्वर्य माचार्याः प्रतिजानते ।
मणिवद् व्यञ्जनं विद्यात् सूत्रवच्च स्वरं विदुः ॥ २
दुर्बलस्य यथा राष्ट्रं हरते बलवान् नृपः ।
दुर्बलं व्यञ्जनं तद्वद्धरेत बलवान् स्वरः ॥ ३
उ-भावश्च विवृत्तिश्च शषसा रेफ एव च ।
जिह्वामूल मुपध्मा च गतिरष्टविधोष्मणः ॥ ४
स्वरप्रत्यया विवृत्तिः सꣳहितायां तु या भवेत् ।
विसर्गस्तत्र मन्तव्यस्तालव्यो वात्र जायते ॥ ५
सन्ध्यक्षरोपधे सन्धौ प्राप्तलुप्तौ यवौ यदि ।
व्यञ्जनाख्या विवृत्तिस्तु स्वराख्या प्रकृतिसꣳहिता ॥६

ऊष्मान्तं विरते यत्र सन्धावो भवते च यत् ।
विसर्गो या भवेत् तत्र स्वराख्यान्तां विनिर्दिशेत् ॥८
यवीभावप्रसन्धान मुकारादि परं पदम् ।
स्वरान्तं तादृशं विद्याद् यदन्यद् व्यक्त मूष्मणः ॥ ९
प्रथमा उत्तमाश्चैव पदान्तेषु यदि स्थिताः ।
द्वितीयꣳ स्थान मापन्नाः श-ष-स-प्रत्ययो यदि ॥ १०
प्रथमानूष्मसंयुक्तान् द्वितीयानिव दर्शयेत् ।
न चैनान् प्रतिजानीयाद् यथा मत्सराः क्षुरोप्सराः ॥११

॥ इति पञ्चमः खण्डः ॥

छन्दोमानं च वृत्तं च पादस्थानं विकारणम् ।
ऋचः स्वच्छन्दवृत्तास्तु पादास्त्वक्षरमानसः ॥ १
ऋवर्णꣳ स्वरभक्तिं च छन्दोमानेन निर्दिशेत् ।
प्रत्ययेन सहारेफं मिमीत स्वरभक्तिषु ॥ २
ऋवर्णे तु पृथग्रेफः प्रत्ययस्तु पृथग् भवेत् ।
विद्याल्लघु मृकारन्तु यदि तूष्माणसंयुतः ॥ ३
उष्मणैव हि संयुक्त ऋकारो यदि पीड्यते ।
गुरुवर्णः स विज्ञेयस्तृचं चात्रानुदर्शनम् ॥ ४
ऋषभं च गृहीतं च बृहस्पतिं पृथिव्यां च ।
निर्ऋतिः पञ्चमा ह्यत्र ऋकारा नात्र संशयः ॥ ५
शषसहरादौ रेफः स्वरभक्तिर्जायते द्विपदां सन्धौ ।

इ-उ-वर्णाभ्याᳯ हीना क्वचिदेकपादाक्रमवियुक्ताः ॥६
स्वरभक्तिर्द्विधा भिन्ना ऋकारो रेफ एव च ।
स्वरोदा व्यञ्जनोदा च विहिताक्षरचिन्तकैः ॥ ७
शषसेषु स्वरोदायाᳯ हकारे व्यञ्जनोदयाम् ।
शषसेषु विवृत्तां तु हकारे संवृतां विदुः ॥ ८
स्वरभक्तिं प्रयुञ्जानस्त्रीन् दोषान् परिवर्जयेत् ।
इकारं चाप्युकारं च ग्रस्तदोषं तथैव च ॥ ९
संयोगपरं छपरं विसर्जनीयं द्विमात्रिकं चैव ।
अवसानिकं च न लघु सानुस्वारं घुटन्तं च ॥ १०

॥ इति षष्ठः खण्डः ॥

पथ्यापादः प्रथमो द्वादशमात्रस्तथा तृतीयोऽपि ।
अष्टादशो द्वितीयः समापनः पञ्चदशमात्रः ॥ १
पथ्यालक्षणमुक्तं या त्वन्या सा स्मृता विपुला ।
अक्षराणां लघु ह्रस्व मसंयोगपरं यदि ॥ २
तत् संयोगोत्तरं विद्याद् गुरु दीर्घाक्षराणि तु ।
विवृत्तिर्यत्र दृश्येत स्वारश्चैवाग्रतः स्थिताः ॥ ३
गुरुः स्वारः स विज्ञेयः क्षैप्रस्तत्र न विद्यते ।
अष्टप्रकारं विज्ञेयं पदानाᳯ स्वरलक्षणम् ॥ ४
अन्तोदात्त माद्युदात्त मुदात्त मनुदात्तं नीचस्वरितम् ।
मध्योदात्तᳯ स्वरितं द्विरुदात्त मित्येता अष्टौ पदसंज्ञाः ॥५

[illegible] प्र वो वीर्यᳯ हविषा स्वर्वनस्पतिः ॥६
[illegible]दमनुदनिपाते आद्यात् ।
[illegible] मुपसर्गं द्विर्नीच माख्यात इति ॥ ७
[illegible]राणि यानि स्युर्द्वायौण्यक्षराणि तु ।
[illegible] ॥चयस्थान्यपोदात्तं निहन्यते ॥ ८
[illegible] यत्र दृश्येत तत्राहन्यात् स्वरं बुधः ।
[illegible] यत्र मृदु तत्र निपातयेत् ॥ ९
[illegible] माचार्यकं नाम मुखं न्यासः करणं प्रतिज्ञोच्चारणा
[illegible] खलु वै सप्रतिज्ञोच्चारणा ॥ १०
यस्य यस्य चिह्नवर्णस्य करणं नोपलभ्यते ।
प्रतिज्ञा तत्र वोढव्या करणᳯ हि तदात्मकम् ॥ ११
तुम्बुरुनारदवसिष्ठविश्वावस्वादयश्च गन्धर्वाः ।
सामसु निभृतं करणं स्वरसौक्ष्म्यात्ते पि हि न कुर्युः ॥१२

॥ इति सप्तमः खण्डः ॥

कौक्षेयाग्निं सदा रक्षेदश्नीयादशनᳯ हितम् ।
जीर्णाहारः प्रबुद्धः सन्नुषसि ब्रह्म चिन्तयेत् ॥ १
शरद्विषुवतोऽतीतादुषस्युत्थान मिष्यते ।
यावद्वासन्तिकी रात्रिर्मध्यमा पर्युपस्थिता ॥ २
आम्रपालाशविल्वाना मपामार्गशिरीषयोः ।
वाग्यतः प्रातरुत्थाय भक्षयेद्दन्तधावनम् ॥ ३

खदिरस्य कदम्बस्य करवीरकरञ्जयोः ।
सर्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः ॥ ४
तेनास्यकरणꣳ सौख्यं माधुर्यं चोपजायते ।
वर्णाꣳश्च कुरुते सम्यक् प्राचीनौदव्रजिर्यथा ॥ ५
त्रिफलां लवणाप्येन भक्षयेच्छिक्षकः सदा ।
अग्निमेधाजनन्येषा स्वरवर्णकरी तथा ॥ ६
कृत्वा चावश्यकान् धर्मान् जाठरं पर्युपास्य च ।
पीत्वा धूमघृतञ्चैव शुचिर्भूत्वा ततो वदेत् ॥ ७
मन्द्रेणोपक्रमेत्पूर्वꣳ सर्वशाखास्वयं विधिः ।
सप्त मन्त्रानतिक्रम्य यथेष्टां वाच मुत्सृजेत् ॥ ८
न तां समीरयेद्वाचं या प्राण मुपरोधयेत् ।
प्राणाना मुपरोधेन वैस्वर्यं चोपजायते ।
स्वरव्यञ्जनमाधुर्यं लुप्यते नात्र संशयः ॥ ९
कुतीर्थादागतं दग्ध मपवर्णैश्च भक्षितम् ।
न तस्य परिमोक्षोऽस्ति पापाहेरिव किल्बिषात् ॥ १०
सुतीर्थादागतं जग्धꣳ स्वाम्नातꣳ सुप्रतिष्ठितम् ।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥ ११
न करालो न लम्बोष्ठो न च सर्वानुनासिकः ।
गद्गदो बद्धजिह्वश्च प्रयोगान् वक्तु मर्हति ॥ १२
एकचित्तो निरुद्धान्तस्तान्तगानविवर्जितः ।

स तु वर्णान् प्रयुञ्जीत दन्तोष्ठं यस्य शोभनम् ॥ १३
पञ्च विद्यां न गृह्णन्ति चण्डास्तब्धाश्च ये नराः ।
अलसाः श्वासरोगाश्च येषां च विसृतं मनः ॥ १४
शनैर्विद्याꣳ शनैरर्थानारोहेत्पर्वतꣳ शनैः ।
शनैरध्वासु वर्त्तेत योजनानां परं व्रजेत् ॥ १५
योजनानाꣳ सहस्रन्तु शनैर्यान्ति पिपीलिकाः ।
अगच्छन् वैनतेयोऽपि पद मेकं न गच्छति ॥ १६
न हि पापीहता वाणी प्रयोगान् वक्तु मर्हति ।
बधिरस्येव तल्पस्था विदग्धा वामलोचना ॥ १७
उपांशु त्वरितं चैव योऽधीते चित्रसन्निभः ।
अपि रूपसहस्रेषु सन्देहेष्वेव वर्त्तते ॥ १८
पुस्तकप्रत्ययाधीतं नाधीतं गुरुसन्निधौ ।
भ्राजते न सभामध्ये जारगर्भा इव स्त्रियः ॥ १९
अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य तु सञ्चयम् ।
अवन्ध्यं दिवसं कुर्याद् दानाध्ययनकर्मसु ॥ २०
यत्कीटैः पाꣳशुभिः श्लक्ष्णैर्वल्मीकः क्रियते महान् ।
न तत्र बलसामर्थ्यं मुद्यमस्तत्र कारणम् ॥ २१
सहस्रगुणिता विद्या शतशः परिकीर्त्तिता ।
आगमिष्यति जिह्वाग्रे स्थलान्निम्न मिवोदकम् ॥ २२
शयाना मिव जात्याना मङ्गरालाङ्गशायिनाम् ।

न हि विद्यार्थिनां निद्रा चिरं नेत्रेषु तिष्ठति ॥ २३
न भोजनविलम्बी स्यान्न च नारीनिबन्धनः ।
सुदूर मपि विद्यार्थी व्रजेद् गरुड़हंसवत् ॥ २४
अहेरिव गणाद्भीतः सौहृद्यान्नरकादिव ।
राक्षसीभ्य इव स्त्रीभ्यः स विद्या मधिगच्छति ॥ २५
न शठाः प्राप्नुवन्त्यर्थान्न क्लीवा न च मानिनः ।
न च लोकरवाद्भीता न च श्वः-श्वः-प्रतीक्षकाः ॥२६
यथा खनन् खनित्रेण भूतले वारि विन्दति ।
एवं गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥ २७
शुश्रूषारहिता विद्या यद्यपि मेधागुणैः समुपयाति ।
वन्ध्येव यौवनवती न तस्य विद्या फलवती भवति ॥२८
द्यूतं पुस्तकवाद्यं च नाटकेषु च सक्तिकाम् ।
स्त्रियं तन्द्रीं च निद्रां च विद्याविघ्नकराणि षट् ॥२९
यथा व्याघ्री हरेत् पुत्रान् दंष्ट्राभिर्न च पीडयेत् ।
भीतापतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ॥ ३०
एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीड़िताः ।
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥ ३१
॥ इति अष्टमः खण्डः ॥ द्वितीयः प्रपाठकश्च समाप्तः ॥

॥ इति नारदीया शिक्षा समाप्ता ॥

———